भागवते ४ । २४ । ७८ ।
"इदं यः कल्य उत्थाय प्राञ्जलिः श्रद्धयान्वितः ।
शृणुयाच्छ्रावयेन्मर्त्त्यो मुच्यते कर्म्मबन्धनैः" ॥

कलयति मत्ततां सम्पादयतीति । अघ्न्यादित्वात् यक् ।) मधु । इति हेमचन्द्रः ॥

कल्यः, त्रि, (कलासु साधुः इति यत् ।) सज्जः । (यथा, महाभारते १ । ५ । ३ ।
"कथयस्व कथामेतां कल्याः स्म श्रवणे तव" ॥)
निरामयः । इत्यमरः । ३ । ३ । १५९ ॥ वाक्श्रुतिवर्जितः । दक्षः । कल्याणवचनम् । उपायवचनम् । इति मेदिनी ॥

कल्यजग्धिः, स्त्री, (कल्ये प्रातर्जग्धिर्भोजनम् ।) प्रातराशः । प्रातर्भोजनम् । इति जटाधरः ॥

कल्यत्वं, क्ली, (कल्य + भावे "त्व तल्" इति त्वम्) आरोग्यम् । इति जटाधरः ॥

कल्यपालः, पुं, (कल्यं मधु मद्यमित्यर्थः पालयतीति । कल्य + पाल् + अण् ।) शौण्डिकः । इति हेमचन्द्रः ॥

कल्यपालकः, पुं, (कल्यं पालयति । कल्य + पाल् + ण्वुल् ।) शौण्डिकः । इति शब्दमाला ॥

कल्यवर्त्तः, पुं, (कल्ये प्रातः वर्त्तते प्राप्यते गृह्यते इति वा यद्वा वर्त्त्यते जीव्यते अनेन । वृत् + णिच् + कर्म्मणि करणे वा अप् ।) प्रातर्भोजनम् । इति त्रिकाण्डशेषः ॥

कल्या, स्त्री, (कडयति मादयति । कड़ मदे णिच् अघ्न्यादित्वात् यक् टाप् च । डस्य लत्वम् । कलयति मादयति वा । कल् + णिच् + यक् टाप् च ।) मद्यम् । इति मेदिनी ॥ शुभात्मिका वाणी । कल्याणवचनम् । इत्यमरः । १ । ६ । १८ ॥ हरीतकी । इति शब्दरत्नावली ॥

कल्याणं, क्ली, (कल्ये प्रातः अण्यते शब्द्यते इति । कल्य + अण् + "अकर्त्तरि चेति" ३ । ३ । १९ । घञ् ।) मङ्गलम् । (यथा, विष्णुपुराणे ।१।१२।१०२।
"स्थानभ्रंशं न चाप्नोति दिवि वा यदि वा भुवि ।
सर्व्वकल्याणसंयुक्तो दीर्घकालञ्च जीवति" ॥)
तत्पर्य्यायः । श्वः २ श्रेयसम् ३ शिवम् ४ भद्रम् ५ शुभम् ६ भावुकम् ७ भविकम् ८ भव्यम् ९ कुशलम् १० क्षेमम् ११ शस्तम् १२ । तद्युक्ते त्रि । इत्यमरः । १ । ४ । २५,२६ ॥ (यथा, मनुः ८ । ३९२ ।
"प्रातिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे" ॥)
स्वर्णम् । इति मेदिनीकरहेमचन्द्रौ ॥

कल्याणबीजः, पुं, (कल्याणं बीजं यस्य ।) मसूरः । इति राजनिर्घण्टः ॥ (मसूरशब्दे विशेषोऽस्य ज्ञेयः ॥)

कल्याणिका, स्त्री, (कल्याण + संज्ञायां कन् ततष्टाप् अत इत्वम् ।) मनःशिला । इति राजनिर्घण्टः ॥ (मनःशिलाशब्देऽस्या विवृतिर्ज्ञेया ॥)

कल्याणिनी, स्त्री, (कल्याणमस्त्यस्या इति इनिः ततः स्त्रियां ङीप् ।) बला । इति राजनिर्घण्टः ॥ कल्याणविशिष्टे त्रि ॥

कल्याणी, स्त्री, (कल्याण + स्त्रियां ङीप् । माषपर्णी । गौः । इति राजनिर्घण्टः ॥ (यथा, रघुः १ । ८७ ।
"उपस्थितेयं कल्याणी नाम्नि कीर्त्तित एव यत्" ॥
कल्याणवती । यथा महाभारते । ३ । ७४ । ५ ।
"दमयन्त्यपि कल्याणी प्रासादस्था ह्युपैक्षत" ॥)

कल्यापालः, पुं, (कल्यां मद्यं पालयतीति । कल्या + पालि + अण् ।) शौण्डिकः । इति त्रिकाण्डशेषः ॥

कल्ल, ङ कूजने । शब्दे । अशब्दे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) लद्वयान्तः । ङ कल्लते लोकः अव्यक्तशब्दं करोति शब्दं न करोतीति वेत्यर्थः । कूजने इति चान्द्रा जौमराश्च ॥ शब्दमात्रे इति केचित् । अशब्दे इति कालापाः । इति दुर्गादासः ॥

कल्लः, त्रि, (कल्लते शब्दं न शृणोति इति । कल्ल + अच् ।) बधिरः । इति त्रिकाण्डशेषः । काला इति भाषा ॥

कल्लत्वं, क्ली, (कल्लस्य भावः । कल्ल + त्वम् ।) स्वरभेदः । इति हेमचन्द्रः ॥ बधिरता च ॥

कल्लोलः, पुं, (कल्ल + बाहुलकात् ओलच् । यद्वा कं जलं लोलं चपलं यस्मात् निपातनात् साधुः ।) महातरङ्गः । बड़ ढेउ इति भाषा । तत्पर्य्यायः । उल्लोलः २ । इत्यमरः । १ । १० । ६ ॥
("कालिन्दीजलकल्लोलकोलाहलकुतूहली" ॥ इत्युद्भटः ॥) हर्षः । शत्रौ त्रि । इति मेदिनी ॥

कव, ऋ ङ स्तुतौ । वर्णे । इति कविकल्पद्रुमः । (भ्वां-आत्मं-सकं-सेट् । ऋदित् ।) ऋ अचकावत् । ङ कवते । इति दुर्गादासः ॥

कवकं, क्ली, (कवते आच्छादयति विस्तारयति वा ॥ कव् + अच् । संज्ञायां कन् ।) छत्राकम् । यथा,—
"देवतार्थं हविः शिग्रुं लोहितान् व्रश्चनांस्तथा ।
अनुपाकृतमांसानि विड्जानि कवकानि च" ॥
कवकानि छत्राकाराणि । वर्ज्जयेदिति प्रत्येकमभिसम्बध्यते । इति मिताक्षरायामाचाराध्यायः ॥

कवकः, पुं, (कव + अच् + संज्ञायां कन् ।) कवलः । ग्रासः । इति हेमचन्द्रः ॥

कवचः, पुं क्ली, (कं देहं वञ्चति विपक्षास्त्राणि वञ्चयित्वा रक्षति इति शेषः । क + वन्च् + अच् । कं वातं वञ्चति वा अन्तर्भूतण्यर्थो वा । यद्वा कवते इति कुधातोरच् प्रत्यय इति केचित् इत्युणादिकोषः ४१ । २ ।) सन्नाहः । साँजोया इति भाषा । (यथा, विष्णुपुराणे । १ । १३ । ४० ।
"शराश्च दिव्या नभसः कवचश्च पपात ह" ॥)
तत्पर्य्यायः । तनुत्रम् २ वर्म्म ३ दंशनम् ४ उरश्छदः ५ कङ्कटकः ६ जगरः ७ । इत्यमरः । २ । ८ । ६४ ॥ दंसनम् ८ जागरः ९ अजगरः १० । इति तट्टीका ॥ कटकः ११ योगः १२ सन्नाहः १३ कञ्चुकः १४ । इति जटाधरः ॥ * ॥ तस्य युक्तिर्यथा ।
खड्गादीनान्तु गणना पूर्व्वमेव निदर्शिता ।
अस्त्रात्मनैव निर्दिष्टकवचादिरपीष्यते ॥
तल्लक्षणं संग्रहेण प्रवक्ष्यामि निबोधत ।
काष्ठं चर्म्म च सकलं अयमेतत्तु दुस्तरम् ॥
यथोत्तरं गुणयुतं तथा पूर्व्वन्तु निन्दितम् ।
शरीरावरकत्वन्तु लघुत्वं दृढ़ता तथा ॥
दुर्भेद्यतेति कथितः कवचे गुणसंग्रहः ।
सन्धिमत्ताविशुद्धता तनुता सुखभेद्यता ॥
कवचानां विनिर्द्दिष्टः समासाद्दोषसंग्रहः ।
अत्र वर्णा विनिर्द्दिष्टाः क्रमादेवं चतुर्व्विधाः ॥
सितो रक्तस्तथा पीतः कृष्णो ब्रह्मादिषु क्रमात् ।
केचित् कुर्व्वन्ति कुशलाः कवचं धातुसम्भवम् ॥
कनकं रजतं ताम्रं लौहं तेषु यथाक्रमम्" ॥
इति युक्तिकल्पतरुः ॥ * ॥
"यथा शस्त्रप्रहाराणां कवचं प्रति वारणम् ।
तथा दैवोपघातानां शान्तिर्भवति वारणम्" ॥
इति मलमासतत्त्वम् ॥ लौहादिवर्म्मवत् अङ्गादिरक्षणार्थं देवतामन्त्रविग्रहम् । तत्तु पूजायां पाठ्यं भूर्ज्जे विलिख्य कण्ठादौ धार्य्यञ्च । इति तन्त्रम् ॥ गर्द्दभाण्डवृक्षः । पटहवाद्यम् । इति मेदिनी ॥

कवचपत्रं, क्ली, (कवचलेखनसाधनपत्रमिव पत्रं वल्कलं यस्य ।) भूर्ज्जपत्रम् । इति शब्दचन्द्रिका ॥

कवटी, स्त्री, (कौति शब्दायते इति । कु + अटन् + गौरादित्वात् ङीष् ।) कवाटः । इति भरतो द्विरूपकोषश्च ॥

कवयी, स्त्री, (कात् जलात् वयते गच्छति इति । क + वय् गतौ + इन् "कृदिकारादक्तिनः" वा ङीष् ।) मत्स्यविशेषः । कयी माछ इति भाषा ॥ तत्पर्य्यायः । क्रकचपृष्ठी २ । इति त्रिकाण्डशेषः ॥ अस्या गुणाः । मधुरत्वम् । स्निग्धत्वम् । बलकारित्वम् । वायुकफनाशित्वञ्च । इति राजवल्लभः ॥ किञ्चित्पित्तकरीति केचित् ॥ ("कवय्यः स्निग्धमधुराः" । इति चक्रपाणिदत्तद्रव्यगुणे ॥)

कवरं, त्रि, (के मस्तके वरं शोभमानत्वात् श्रेष्ठम् ।) केशपाशः । इत्यमरटीका ॥ (यथा भागवते ५ । २ । ७ । "वसनस्यन्दनस्तनकलशकवरभाररशनां देवीम्" ॥) संपृक्तम् । खचितम् । इति हलायुधः ॥

कवरः, पुं स्त्री, (कं जलं वृणोति । क + वृ + अच् ।) लवणः । अम्लः । इति मेदिनी हेमचन्द्रश्च ॥ (कौतीति । कुशब्दे + "कोररन्" । उणां ४ । १५४ । इति अरन् । पाठकः । इत्युज्ज्वलदत्तः ॥ कर्व्वुरवर्णः । इति हलायुधः । यथा, माघे ५ । १९ ।
"वृद्वैव निर्ज्जितकलापभरामधस्ता-
द्व्याकीर्णमाल्यकवरां कवरीं तरुण्याः" ॥)

कवरकी, स्त्री, (कवरं केशपाशं किरति विक्षिपति यत्र इति । कवर + कॄ + बाहुलकात् ड गौरादित्वात् ङीष् । कारावासदुःखेन केशादिपारिपाट्यराहित्यात् तथात्वम् ।) कारागारबद्धः । इति हारावली । कयेदी इति भाषा ॥

कवरा, स्त्री, (कवर + अजादित्वात् टाप् ।) खरपुष्पा । इति शब्दचन्द्रिका । बावुइ इति भाषा ॥

कवरी, स्त्री, (कं शिरः वृणोति आच्छादयति । क + वृ + अच् + जानपदेत्यादिना ङीष् । कु + अरन् ङीष् वा ।) केशविन्यासः । खुलेर खोपा टिकी इति भाषा । तत्पर्य्यायः । केशवेशः २ कवरः ३ केशगर्भकः ४ । इति शब्दरत्नावली ॥
("गोपीभर्त्तुर्व्विरहविधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकवरी निःश्वसन्ती विशालम्" ॥
इति पदाङ्कदूते । १ ॥) बर्बरा । बावुइ इति